श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ नवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ नवतितमः सर्गः ॥

## अश्वमेधानुष्ठानेनेलायाः पुरुषत्वस्य प्राप्तिः

तथोक्तवति रामे तु तस्य जन्म तदद्भुतम्।
उवाच लक्ष्मणो भूयो भरतश्च महायशाः॥ 7.90.1 ॥

इला सा सोमपुत्रस्य संवत्सरमथोषिता।
अकरोत् किं नरश्रेष्ठ तत्त्वं शंसितुमर्हसि॥ 7.90.2 ॥

तयोस्तद् वाक्यमाधुर्यं निशम्य परिपृच्छतोः।
रामः पुनरुवाचेमां प्रजापतिसुते कथाम्॥ 7.90.3 ॥

पुरुषत्वं गते शूरे बुधः परमबुद्धिमान्।
संवर्तं परमोदारमाजुहाव महायशाः॥ 7.90.4 ॥

च्यवनं भृगुपुत्रं च मुनिं चारिष्टनेमिनम्।
प्रमोदनं मोदकरं ततो दुर्वाससं मुनिम्॥ 7.90.5 ॥

एतान् सर्वान् समानीय वाक्यज्ञस्तत्त्वदर्शनः।
उवाच सर्वान् सुहृदो धैर्येण सुसमाहितान्॥ 7.90.6 ॥

अयं राजा महाबाहुः कर्दमस्य इलः सुतः।
जानीतैनं यथाभूतं श्रेयो ह्यत्र विधीयताम्॥ 7.90.7 ॥

तेषां संवदतामेव द्विजैः सह महात्मभिः।
कर्दमस्तु महातेजास्तदाश्रममुपागमत्॥ **7.90.8**॥

पुलस्त्यश्च क्रतुश्चैव वषट्कारस्तथैव च।
ओङ्कारश्च महातेजास्तमाश्रममुपागमन्॥ **7.90.9**॥

ते सर्वे हृष्टमनसः परस्परसमागमे।
हितैषिणो बाह्लिपतेः पृथग्वाक्यान्यथाब्रुवन्॥ **7.90.10**॥

कर्दमस्त्वब्रवीद् वाक्यं सुतार्थं परमं हितम्।
द्विजाः शृणुत मद्वाक्यं यच्छ्रेयः पार्थिवस्य हि॥ **7.90.11**॥

नान्यं पश्यामि भैषज्यमन्तरा वृषभध्वजम्।
नाश्वमेधात् परो यज्ञः प्रियश्चैव महात्मनः॥ **7.90.12**॥

तस्माद् यजामहे सर्वे पार्थिवार्थे दुरासदम्।
कर्दमेनैवमुक्तास्तु सर्व एव द्विजर्षभाः॥ **7.90.13**॥

रोचयन्ति स्म तं यज्ञं रुद्रस्याराधनं प्रति।
संवर्तस्य तु राजर्षिः शिष्यः परपुरञ्जयः॥ **7.90.14**॥

मरुत्त इति विख्यातस्तं यज्ञं समुपाहरत्।
ततो यज्ञो महानासीद् बुधाश्रमसमीपतः॥ **7.90.15**॥

रुद्रश्च परमं तोषमाजगाम महायशाः।
अथ यज्ञे समाप्ते तु प्रीतः परमया मुदा॥ **7.90.16**॥

उमापतिर्द्विजान् सर्वानुवाच इलसन्निधौ।
प्रीतोऽस्मि हयमेधेन भक्त्या च द्विजसत्तमाः॥ **7.90.17**॥

अस्य बाह्लिपतेश्चैव किं करोमि प्रियं शुभम्।
तथा वदति देवेशे द्विजास्ते सुसमाहिताः॥ **7.90.18**॥

प्रसादयन्ति देवेशं यथा स्यात् पुरुषस्त्विला।
ततः प्रीतो महादेवः पुरुषत्वं ददौ पुनः ॥ **7.90.19** ॥

इलायै सुमहातेजा दत्त्वा चान्तरधीयत।
निवृत्ते हयमेधे च गते चादर्शनं हरे ॥ **7.90.20** ॥

यथागतं द्विजाः सर्वे तेऽगच्छन् दीर्घदर्शिनः।
राजा तु बाह्लिमुत्सृज्य मध्यदेशे ह्यनुत्तमम् ॥ **7.90.21** ॥

निवेशयामास पुरं प्रतिष्ठानं यशस्करम्।
शशबिन्दुश्च राजर्षिर्बाह्लिं परपुरञ्जयः ॥ **7.90.22** ॥

प्रतिष्ठाने इलो राजा प्रजापतिसुतो बली।
स काले प्राप्तवान् लोकमिलो ब्राह्ममनुत्तमम् ॥ **7.90.23** ॥

ऐलः पुरूरवा राजा प्रतिष्ठानमवाप्तवान्।
ईदृशो ह्यश्वमेधस्य प्रभावः पुरुषर्षभौ।
स्त्रीभूतः पौरुषं लेभे यच्चान्यदपि दुर्लभम् ॥ **7.90.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे नवतितमः सर्गः ॥